Homas
the spiritual way to success

K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ विद्याप्रदमन्त्रप्रसङ्गात् विद्याप्रदविद्यागोपालमन्त्रोपि लिख्यते—

श्रीनारदऋषिः। अनुष्टुप् छन्दः। श्रीकृष्णो देवता। मन्त्रेण व्यस्तेन समस्तेन वा पञ्चाङ्गानि॥

ध्यानम्—

दिव्योद्याने विवस्वत्प्रतिममणिमये मण्डपे योगपीठे
मध्ये यस्सर्ववेदान्तमयसुरतरोस्सन्निषण्णो मुकुन्दः।
वेदैः कल्पद्रुरूपैः *शिखरिशतसमालम्बिकोशैश्चतुर्भिः
न्यायैस्तर्कैः पुराणैस्स्मृतिभिरभिवृतस्तादृशैश्चामराद्यैः॥

दद्याद्बिभ्रत्कराब्जैररिदरमुरलीपुष्पबाणेक्षुचापान्
अक्षस्रक्पूर्णकुम्भौ स्मरललितवपुर्दिव्यभूषाङ्गरागः।
व्याख्यां वाचे वितन्वन् स्फुटरुचिरपदां वेणुना विश्वमात्रे
शब्दब्रह्मोद्भवेन श्रियमरुणरुचिर्वल्लवीवल्लभो नः॥

कृष्ण कृष्ण महाकृष्ण सर्वज्ञ त्वं प्रसीद मे।
रमारमण विश्वेश विद्यामाशु प्रयच्छ मे॥

इति मन्त्रः॥ लक्षं जपेत्॥

---

* शिवारितशतमालम्बि इति ग ट पाठः

अथ विद्यागोपालप्रसङ्गात् क्रमदीपिकोक्तविद्याप्रदगोपालकमन्त्रोपि लिख्यते श्रीनारद ऋषिः । गायत्री छन्दः । श्रीकृष्णो देवता । ऐं क्लीं कृष्णाय हृत् । ह्रीं गोविन्दाय शिरः । श्रीं गोपीजन शिखा । वल्लभाय कवचम् । स्वाहा सौः अस्त्रम् ॥ ध्यानम्—

वामोर्ध्वहस्ते दधतं विद्यासर्वस्वपुस्तकम् ।
अक्षमालां च दक्षोर्ध्वे स्फाटिकीं मातृकामयीम् ॥

शब्दब्रह्ममयीं वेणुमधःपाणिद्वयेरितम् ।
गायन्तं पीतवसनं श्यामळं कोमलच्छविम् ॥

बर्हिबर्हकृतोत्तंसं सर्वज्ञं सर्ववेदिभिः ।
उपासितं मुनिगणैरुपतिष्ठेद्धरिं सदा ॥

ध्यात्वैवं प्रमदावेषविलासं भुवनेश्वरम् ।
चतुर्लक्षं जपेन्मन्त्रममुं मन्त्री सुसंयतः ॥

ऐं क्लीं कृष्णाय ह्रीं गोविन्दाय श्रीं गोपीजनवल्लभाय स्वाहा सौः ॥ इति मन्त्रः द्वात्रिंशत्यक्षरः। विद्याफलप्रधानोयं मन्त्रः । चतुर्लक्षजपः । त्रिमधुरसिक्तैः पलाशकुसुमैः दशांशं जुहुयात् पुरश्चरणार्थम् । त्रिंशत्यक्षरी-विधानोक्तवत्पूजा । अस्य मन्त्रस्य फलमाह—

योस्मिन्निष्णातधीर्मन्त्री वर्तते वक्त्रगह्वरात् ।
गद्यपद्यमयी वाणी तस्य गङ्गाप्रवाहवत् ॥

सर्ववेदेषु शास्त्रेषु सङ्गीतेषु च पण्डितः ।
संवित्तिं परमां लब्ध्वा चान्ते भूयात्परं पदम् ॥

अथ गोपालसामान्यात् सन्तानगोपालमन्त्रोपि लिख्यते—